अगले प्रत्येक मन्त्रसे प्रत्येक बार ललाटपर मार्जन करें

हिरण्यवर्णा इत्यस्य कश्यप ऋषिः । त्रिष्टुप्छन्दः । आपो देवता । मार्जने विनियोगः ॥

ओं हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥

यासां देवा दिवि कृण्वन्ति भक्षयं या अन्तरिक्षे बहुधा भवन्ति । या अग्निं ग० ॥

यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । या अग्निं गर्भं० ॥

शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे । मधुश्च्युतः शुचयो याः पावकास्ता न आपः शं स्योना भवन्तु ॥ (अगले ७ मन्त्र इसके भाष्यमें अधिक पाते हैं॥)

हिरण्यवर्णाः शुचयः पावका विचक्रमुर्हित्वावद्यमापः । शतं पवित्रा विततान्यासां ताभिर्मा देवः सविता पुनातु ॥

अब ६ मन्त्र 'पावमानीः' नामक हैं:—

पवमान ऋषिः । सोमो देवता । अनुष्टुप्छन्दः ॥

ओं यः पावमानीरध्येति ऋषिभिः सम्भृतं रसम् । सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥ १ ॥ यः पावमानीरध्येति पवित्रकरणीरपाम् । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥ २ ॥ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्च्युतः । ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतं हितम् ॥ ३ ॥ पावमानीः स्वस्त्ययनीर्याभिर्गच्छति नन्दनम् । पुण्यांश्च भक्ष्यान्भक्षयत्य-

मृतत्वं च गच्छति ॥ ४ ॥ पावमानीर्दिशन्तु न इमं लोकमथो अमुम् । कामान्समर्धयन्तु नो देवैर्देवीः समाहृताः ॥५॥ येन देवाः पवित्रेणात्मानं पुनते सदा । तेन सहस्रधारेण पावमान्यः पुनन्तु नः ॥ ६ ॥

।सिन्धुद्वीपस्याम्बरीषस्य वार्षम् । अब्दैवत्या । गायत्री । मार्जने विनियोगः ॥

ओं शन्नो देवीरभीष्टय आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥

अब्दैवत्यानुष्टुप्सोमपुत्रस्याध्वरस्य मार्जने विनि०॥

ओं शन्न आपो धन्वन्याः । ओं शन्नः सन्त्वनूप्याः ॥ ओं शन्नः समुद्रिया आपः । ओं शमु नः सन्तु कूप्याः ॥

देवश्रवसो यामायनस्य त्रिष्टुभापः मार्जने विनि०॥

ओं आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वं हि रिप्रं प्रवहन्ति देवीः । उदिदाभ्यः शुचिरापूत एमि ॥

सिन्धुद्वीप ऋ० अनुष्टुप्छ० आपो दे० मार्जने वि०॥

ओं इदमापः प्रवहत यत्किं च दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥

आथर्वणस्य भिषजोऽनुष्टुप् आपः ।

ओं मुञ्चन्तु मा शपथ्या३दथो वरुण्या-दुत । अथो यमस्य पड्वीशात्सर्वस्माद्देवकि-ल्बिषात् ॥ गायत्री ॥ ओं यज्जाग्रद्यत्सुप्तः पापमभिजगाम सर्वस्मान्मा तस्मादेनसः प्रमुञ्चतु ॥

वामदेवस्य दधिक्राऽनुष्टुप् ।

ओं दधिक्राव्णो अकारिषं जिष्णोर-श्वस्य वाजिनः । सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥

अघमर्षणम् । = बुरे कर्म और अभक्ष्यभक्षण आदि पापोंसे बचनेके मन्त्र :— जिस प्रकार अश्वमेध सोमयाग आदि यज्ञोंसे पाप नष्ट होजाते हैं उसी प्रकार अघमर्षण सूक्तसे सब पाप दूर होजाते हैं ॥ और यदि आपत्कालमें द्विजने शूद्रके घरमें अन्न खाया हो तो वह मनमें पछताने और सौ बार 'द्रुपदा' मन्त्र जपनेसे शुद्ध होता है ॥

तीन बार अञ्जलिमें जल उठाकर तीन बार मन्त्र पढते सिर से उस जलका वन्दनकरके जलमें फेंक देवें ॥ फिर गोकर्ण जैसे

हाथमें जल उठाकर उस जलको सूंघकर इसी मन्त्रको एक बार पढें, इस जलको न देखकर बाईं तरफ फेंकें। और बायें नथनेसे सांस बाहिर छोडकर पापपुरुषको शरीरमें से निकालें ॥

कोकिलस्य राजपुत्रस्यानुष्टुबापः सौत्रामण्यवभृथस्नानेऽघमर्षणे विनियोगः ॥

ओं द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥

जलमें दो हाथ रखकर (अघमर्षण सूक्त) अर्थात् ऊपरका एक मन्त्र, और नीचेके तीन मन्त्र (द्रुपदा० ऋतंच० समुद्रा० सूर्याचन्द्र०) इन चार मन्त्रोंको पढते जलका आवर्तन (घुमाना) करें

माधुरछन्दसोघमर्षणो भाववृत्तमनुष्टुप् । अघमर्षणे विनियोगः ॥

ओं ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥ १ ॥

समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ २ ॥

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्ष-

मथो स्वः ॥ ३ ॥

सातों मन्त्रोंसे सात बार माथेपर मार्जन करें।

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ॥

नीचेके मन्त्रसे तीन आचमन करें

ब्रह्मतिरश्चीनस्यानुष्टुप् परमात्मा आचमने विनि०॥

ओं अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः। त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥

अब **प्राणायाम** करें। फिर खडा होकर गायत्री मन्त्रसे तीन बार सूर्य मण्डलकी तरफ उछलकर तीन जलाञ्जलियां देवें ॥(उदय और अस्तमें तीस करोड राक्षस (मन्देहा नाम) सूर्यदेवतासे लडनेको आते हैं। इस कारण यह जल वज्र बनकर उनको हटाता है। यह बात जानकर जो विप्र उपासना करता है उसकी बडी आयु होती है। और वह पापोंसे छूट जाता है ॥)

ओं भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ओं ३ ॥

जलाञ्जलि उठाकर उसमेंसे जल छोडते और दाईं ओरसे प्रदक्षिणा करते विपरीतगायत्री पढें ॥ (राक्षसोंपर उपरका जल फेंकने समय गायत्री मन्त्र अस्त्र बनता है उसी अस्त्रको इस उलटे मन्त्रसे वापस लाया जाता है ॥)

तृयादचोग्र नः यो योधि हिमधी स्यन्दे गौभ तर्यरेवंतुवित्सत ॥

अब सायं और प्रातःका उपस्थान ॥

उप=ध्यान धारणासे ईश्वरके समीपमें ठहरकर, स्थान=उसकी स्तुति उपासनामें ठहरना ।

(प्रातः कालको खडा होकर और हथेलियां ऊपर करके, सायं कालको बैठके और हथेलियां नीचे करके, और मध्याह्नको बैठ के और हथेलियां उपर करके उपस्थान करना चाहिये । परन्तु तीनों काल बगल छुपे रहें ॥)

उपस्थानसे वाणी मन और शरीरसे उत्पन्न पाप नष्ट होजाते हैं। और मनुष्यको दैवी सम्पत् (श्रीगीता अ० १६ श्लो० १—३) प्राप्त हो जाती है। तथा आसुरी सम्पत् (श्रीगीता अ० १६ श्लो० ४) नाशको जाती है ॥)

प्रस्कण्वस्यानुष्टुप्सूर्यः उपस्थाने विनियोगः ।

ओं उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योति-रुत्तमम् ॥

प्रस्कण्वस्य गायत्रं सूर्यः उपस्थाने विनियोगः ।

ओं उदु त्यं जातवेदसं देवं वहन्ति के-तवः । दृशे विश्वाय सूर्यम् ॥

कुत्सस्य त्रिष्टुप्सूर्यः

ओं चित्रं देवानामुदगादनीकं चक्षुर्मि-त्रस्य वरुणस्याग्नेः । आ प्रा द्यावापृथिवी

अन्तरिक्षँ सूर्य आत्मा जगतस्तस्थुषश्च ॥
दध्यङ्ङाथर्वणस्य त्रिष्टुप्सूर्यः ॥
ओं तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतँ शृणुयाम शरदः शतं प्र ब्रवाम शरदः शतमऽदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥
वामदेवस्य जगती परमात्मरूपः सूर्यो देवता ॥
ओं हँसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ अब मध्याह्नका उपस्थानः—
[सिंहीसंवत्सरीयस्य] विभ्राट् सौर्यस्य जगती सूर्यः ॥
ओं विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् । वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्त्ति बहुधा विराजति ॥
(नीचले १६ मन्त्रोंका नाम 'पुरुषसूक्त' है । एक मासतक इसके नित्य १६पाठ करनेसे मनुष्य गुरुतल्प गमनके पापसे छूट जाता है ॥ देखो मनुस्मृति अ० ११ श्लो० २५२)

अञ्जलि धरकर पढें

आनुष्टुबस्य सूक्तस्य त्रिष्टुबन्तस्य देवता। विश्वात्मा पुरुषः साक्षाद्दृषिर्नारायणः स्मृतः॥

ओं पुरुषमेधः पुरुषस्य नारायणस्यार्षम्॥

ओं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलम्॥१॥ पुरुष एवेदँ सर्वं यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति॥ २ ॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥३॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः। ततो विष्वङ्व्यक्रामत्साशनानशने अभि॥४॥ तस्माद्विराळजायत विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥५॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥ ६ ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः। तेन देवा अयजन्त सा-

ध्या ऋषयश्च ये ॥७॥ तस्माद्यज्ञात्सर्व-हुतः संभृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ ८ ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ९ ॥ तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ १० ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥ ११ ॥ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्याँ शूद्रो अजायत ॥ १२ ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ १३ ॥ नाभ्या आसीदन्तरिक्षँ शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः

सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

(शिवसङ्कल्पके अनेक फलोंमें से एक फल यह है कि एक मास तक नित्य एक २ पाठ करनेसे ब्राह्मण सोना चुरानेके पापसे छूट जाता है। मनुः अ-११ श्लो-२५१)

(शिवसंकल्पस्य) ब्रह्मणस्त्रिष्टुप्मनः उपस्थाने वि०॥

ओं यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥ १ ॥ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिव० ॥ २ ॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु। यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिव० ॥ ३ ॥ येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम्। येन यज्ञ-

स्तायते सप्त होता तन्मे मनः शिव० ॥४॥ यस्मिन्नृचः साम यजूँषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः । यस्मिँश्चित्तँ सर्वमोतं प्रजानां तन्मे मनः शिव० ॥ ५ ॥ सुषार·थिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीषु·भिर्वाजिन इव । हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिव० ॥ ६ ॥ अथ य एष ए·तस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पु·रुषः । अथ य एष एतस्मिन्मण्डले पुरुषोऽयमेव स योऽयं दक्षिणेऽक्षन्पुरुषः ॥ उपस्थान करें

(रुद्र ऋ० सूर्यो दे० त्रिष्टुप्छ० उपस्थाने विनि०)

शुक्रियं रुद्रस्य । य उदगात्पुरस्तान्महतो अर्णवाद्विभ्राजमानः सरिरस्य मध्ये स·मामृषभो लोहिताक्षः सूर्यो विपश्चिन्मन·सा पुनातु । यद्ब्रह्मवादिष्म तन्मा मा·हिंसीत्सूर्याय विभ्राजाय वै नमो नमः ॥

अब गायत्री जप है ।

जपके आरम्भमें अङ्गन्यास करना होताहै ॥ नीचेके मन्त्रोंको पढते समय इन स्थानोंको हाथोंकी अंगुलियोंसे नोबतवार स्पर्श करें।

जिन स्थानोंके नाम मन्त्रोंके साथ हैं।

न्यासमें अङ्गोंकी पुष्टिकी प्रार्थना करनी चाहिये॥ अङ्गों पर 'अ' आदि देवता और 'भूः' आदि लोकोंका स्थान मानना चाहिये॥ बिना न्यासके जपफलका आधा भाग राक्षस लेजाते हैं॥

अङ्गन्यासः

ओं=(अ+उ+म्) अ नाभौ। (नाफको) उ हृदि। म शिरसि। (सिरको) ओं भूः पादयोः। ओं भुवः हृदि। ओं स्वः शिरसि॥

करन्यासः

ओं भूः अङ्गुष्ठाभ्यां नमः। अंगुलियोंसे अंगूठोंको
ओं भुवस्तर्जनीभ्यां नमः। अंगूठोंसे तर्जनीयोंको
ओं स्वर्मध्यमाभ्यां नमः। अंगूठोंसे मध्यमाओंको
ओं महः अनामिकाभ्यां नमः। } अंगूठोंसे अनामिकाओंको
ओं जनः कनिष्ठिकाभ्यां नमः। } अंगूठोंसे कनिष्ठाओंको
ओं तपः सत्यं करतलकरपृष्ठाभ्यां नमः।
अंगूठोंसे हथेलियों और हाथों की पीठों को स्पर्श करें॥

अङ्गन्यासः

ओं भूः पादयोः। ओं भुवः जान्वोः। घुठनोंको ओं स्वः गुह्ये। मल छोडनेके स्थानको ओं महः नाभौ। ओं जनः हृदि। ओं तपः कण्ठे। ओं सत्यं शिरसि।

षडङ्गन्यासः

ॐ भूः हृदयाय नमः। हृदयको तर्जनी, मध्यमा और अनामिकाओंसे ॐ भुवः शिरसे स्वाहा। सिरको मध्यमाओं और अनामिकाओंसे ॐ स्वः शिखायै वषट्। बोधीको अंगूठोंसे ॐ महः कवचाय हुम्। वक्षोंको दसों अंगुलियोंसे ॐ जनः नेत्राभ्यां वौषट्। नेत्रोंको तर्जनी मध्यमा और अनामिकाओं से ॐ तपः सत्यमस्त्राय फट्। दायें हाथको सिरपरसे घुमाकर इसीकी तर्जनी मध्यमासे चटखायें

उपरके करन्यासकी तरह स्पर्श करें

ॐ तत्सवितुरङ्गुष्ठाभ्यां नमः। वरेण्यं तर्जनीभ्यां नमः। भर्गो देवस्य मध्यमाभ्यां नमः। धीमहि अनामिकाभ्यां नमः। धियो यो नः कनिष्ठिकाभ्यां नमः। प्रचोदयात्करतलकरपृष्ठाभ्यां नमः।

उपरके अङ्गन्यासकी तरह करें

ॐ तत्पादयोः। सवितुर्जान्वोः। वरेण्यं कट्याम्। भर्गो नाभौ। देवस्य हृदये। धीमहि कण्ठे। धियो नासिकायाम्।

यः चक्षुषोः । नः ललाटे । प्रचोदयात् शिरसि । उपरके षडङ्गन्यासकी तरह करें ।

ॐ तत्सवितुर्हृदयाय नमः । वरेण्यं शिरसे स्वाहा । भर्गो देवस्य शिखायै वषट् ; धीमहि कवचाय हुम् । धियो यो नः नेत्राभ्यां वौषट् । प्रचोदयादऽस्त्राय फट् । अङ्गन्यासकी तरह करें । ॐ आपः स्तनयोः । ज्योतिर्नेत्रयोः । रसो मुखे । अमृतं ललाटे । ब्रह्मभूर्भुवः स्वरों शिरसि ॥

अब मुद्रायें वस्त्रसे हाथोंको छिपाकर करें । किसीकी दृष्टिमें न करें । (इनके करनेका आकार अन्तमें देखो) तन्त्र शास्त्रोंमें लिखा है कि जो मुद्राओंको न जाने उसका जप निष्फल होताहै

ॐ 'तत्' समाय नमः । 'स' सम्पुटाय नमः 'वि' विततायं नमः । 'तु' विस्तीर्णाय नमः । 'व' द्विमुखाय नमः । 'रे' त्रिमुखाय नमः । 'णि' चतुर्मुखाय नमः । 'यं' पञ्चमुखाय नमः । 'भ' षण्मुखाय नमः । 'गों' अधोमुखाय नमः । 'दे' व्यापकाञ्जलये नमः । 'व' शकटाय नमः । 'स्यं' यमपाशाय नमः ।

'धी' ग्रन्थिकायै नमः । 'म' संमुखोन्मुखाय नमः। 'हि' विलम्बाय नमः । 'धि' मुष्टिकायै नमः। 'यो' मीनाय नमः । 'यो' कूर्माय नमः । 'नः' वराहाय नमः। 'प्र' सिंहाक्रान्ताय नमः। 'चो' महाक्रान्ताय नमः। 'द' मुद्गराय नमः । 'यात्' पल्लवाय नमः ॥ प्राणायाम करें

गायत्री सर्वोत्कृष्ट मन्त्र है इसके यथार्थ ज्ञानसे विशेष फल होता है जिन मनुष्योंके लिये गर्भाधानसे लेके मरणपर्यन्त षोडश संस्कार कहे हैं उनही को गायत्रीका अधिकार है औरोंको नहीं ॥ जो मनुष्य तीन वर्षतक निरालस्य गायत्रीका जप करे । तो वायुकी तरह बिना रुकावटके वह ब्रह्मरूप होकर ब्रह्मको पाता है ॥ मनुः अ० २ श्लो० ८०-८१-८२

गायत्रीके आदि और अन्तमें प्रणव अवश्य लगाना चहिये नहीं तो जप निष्फल होगा । जब मनुष्यको वेदपाठ पढनेकी शक्ति नहो तो वह बनमें जलके समीप केवल गायत्रीको विधि पूर्वक पढे तो भी फल विशेष है। मनुः अ० २ श्लो० १-४

'ओं भूः' 'ओं भुवः' 'ओं स्वः' और गायत्रीके तीनों चरण परमात्माके मिलनेके द्वार हैं। इनको वेद पढनेवाले ब्राह्मण दोनों वक्तकी सन्ध्यामें जपें । तो कुल वेदपाठके फलको प्राप्तकर लेते हैं। मनुः अ०२ श्लो० ८१-७८ जो एक मासतक घरसे बाहर नित्य १००० बार जप करे। तो बढे पापसे छूट जाता है जैसे सांप केंचुलसे छूटता है॥ मनुः अ० २ श्लो० ७९

अब दायें हाथसे जलको उठाकर जलमें छोडते पढें ॥ (मनमें निश्चय करें कि मैं धर्म, अर्थ, काम, और मोक्षके अर्थ

गायत्री मन्त्रका दशांश, एकमाला या दस मालायें जपों)

ॐ अस्य श्रीतत्सवितुरितिमन्त्रस्य विश्वामित्र ऋषिः । गायत्रं च्छन्दः । सविता देवता । आत्मनो वाङ् मनः कायोपार्जितपापनिवारणार्थे धर्मार्थ काम मोक्षार्थे श्रीमहागायत्री सहस्रजपे (एकमालाजपे, दशांशजपे) विनियोगः ॥

नमस्कार धरके पढ़ें

अथ ध्यानम् । मुक्ता विद्रुमहेमनीलधवल-च्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्न-मुकुटां तत्त्वात्मवर्णात्मिकाम् । गायत्रीं वरदाभयांकुशकरां शूलं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

प्रभातकी सन्ध्या 'गायत्री' सुर्खवर्ण ऋग्वेद मुखवाली भूलोक स्थित ब्रह्मरूपिणी राजहंस पर आरूढ है। मध्याह्नकी सन्ध्या 'सावित्री' सफेदवर्ण यजुर्वेद मुखवाली अन्तरिक्षस्थित शिवरू-पिणी वृषभारूढ है । सायंकालकी सन्ध्या 'सरस्वती' नीलवर्ण सामवेद मुखवाली स्वर्लोकस्थित विष्णुरूपिणी गरुड सवार है॥

अञ्जलि धरकर तीनबार पढ़ें ॥

आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादि-नि । गायत्रि छन्दसां मातर्ब्रह्मयोने न-मोऽस्तुते ३ ॥

फिर प्राणायाम करें ।

गायत्री रहस्यमें लिखा है कि शापसे मुक्त गायत्री चतुर्वर्ग फलको देनेवाली है और शापमुक्त न होनेपर चतुर्वर्गका नाश करती है। इसी प्रकार तन्त्रोंमें भी शापमोचन करनेकी आवश्यकता लिखी है। और यहां पूर्वकालसे ही इसके करनेका शिष्टाचार है। इस कारण इसके कई शापमोचनोंमें से जो एक यहां प्रचलित है उसको लिख रखते हैं ॥

अथ शापोद्धारः

ओं विश्वामित्र ऋ० विष्टारपांक्तिः छ० प्रजापतिर्दे० शापोद्धारे विनियोगः ॥

ओं ब्रह्मणाग्निः संविधानो रक्षोहा बाधतामितः । अमीवायुस्ते गर्भे दुर्नामयोनिमाशये ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

सुभद्रा पावनी सुधा गायत्री विश्वभेषजम् । विशापामेनां कृत्वा तु यथास्तं विपरीतन ॥

ओं एं ऐं आवाय व्ययावायव्ययान्यौर्वयाय वा ओं २

ओं हरोसि पाप्मानं मे विद्धि । इति प्रातः ।

ओं तद्भर्गोसि पाप्मानं मे विद्धि । इति मध्याह्ने ।

ओं संविदसि पाप्मानं मे विद्धि । इति सायम् ।

ओं कारास्त्रेण नित्यं त्वं बिन्दुबीजेन शोभिता । मुनीनामनुरोधेन शापमोक्षो भवेत्त्वयि ॥ अहो देवि महादेवि देवि सिद्धे सरस्वति । अजरे अमरे देवि वासिष्ठशापमोचिता ॥

॥ इति शापमोचनम् ॥

अञ्जलि धरकर विज्ञप्ति करें ।

ॐ दुर्निवारभयध्वान्तध्वंसनैककृतेक्षणाम् । नौमि मोहविनाशाय भीतो ब्रह्माधिदेवताम् ॥ दुर्गतिं हर मे देवि बहुजन्मशतार्जिताम् । प्राप्य कल्पतरुच्छायां कथं संतप्यते जनैः ॥ पश्य मामाशु गायत्रि विभ्रान्तं स्निग्धचक्षुषा । न बालमबलं पुत्रं मुञ्चत्यग्रगमऽम्बिका ॥ एहि मां पाणिपद्मेन देहि तूर्णं वरं शुभम् । महामोहाकुलं पुत्रं देवि मां स्पृश नित्यशः ॥ मातः प्रतीक्षते नार्तो यत्तदाशु प्रसीद मे । धृताक्षसूत्रं सावित्रि निर्विघ्नं पश्य मामिह ॥ भृण्वतो नान्यकृत्यं स्यात्त्वं परहितं कुरु । ब्रह्मविष्णुहराद्यास्त्वामाश्रयन्ति सुरेश्वरि ॥

अब अक्षमालाको जो १०८ दाने समेरु और ब्रह्मग्रन्थि वाली हो, धोकर समेरु पर तिलक, अर्घ, पुष्प, धूप, दीप, नैवेद्य, और दक्षिणा हरएक वस्तु "ह्रीं सिद्धयै अक्षमालाभगवत्यै नमः" इस मंत्र से निवेदनकरके और "माले माले महामाले सर्वतत्त्वस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तं तस्मान्मे सिद्धिदा भव ॥"
इस मन्त्रसे प्रार्थनाकरके ताम्बूल मुखमें डालकर प्रातः सन्ध्यामें खडे और सायं और मध्याह्न सन्ध्यामें पद्मासन वा सिद्धासन से बैठकर मन्त्रका जप किया करें ॥

चौकडी लगानेमें दाईं रानपर बायां पैर और बाईं रान पर दायां पैर रखकर भुजाओंको पीठके पीछेसे घुमाकर दायें हाथसे बायें पादके अंगूठेको, और बायें हाथसे दायें पादके अंगूठेको पकडे, और ठोढी हृदयसे लगावे, और नासिकाके अग्रको वा भ्रूमध्यको देखे, यह पद्मासनका प्रकार है । समाधिके उपयोगी है । मालाजपके समय केवल पैर और नेत्रही जमावे ॥

मुख जिह्वा आदिसे मन्त्रका उच्चारण नकरें । केवल मनमें जपें ।

जपकालमें दायें हाथ और मालाको हृदयके साथ धराकरें। और छुपा रखें ॥ छाती गर्दन और सिर न झुकाकर रखें। नाकके अग्र पर वा भ्रूमध्यपर वा सूर्य उदय होनेके स्थान (उफक) पर दृष्टिको जमायें। जिह्वा हूएठ वा कोई अङ्ग न हिलायें दांत न दिखलायें॥

अनामिका और कनिष्टाके सहारेपर मध्यमाको रखकर इसके अगले पर्वपर अंगूठेसे एक मन्त्रजपकर एक २ दानेको हथेलीकी तरफ छोडते जायें। अन्तके दानेपर पहुंचकर अगर दूसरी तीसरी माला करनी हो तो मालाको मोडकर अन्तके दानेसेही फिर आरम्भकरना चाहिये॥ तर्जनीसे मालाको न छूहें। इसको मालासे दूर रखें॥ घरसे नदीतक मालाको पगडी के नीचे रखकर लाया करें॥ यह माला न किसीको देदेनी न दिखानी। अवसर जियादा नहोनेपर दशांश तो अवश्य करना चाहिये॥

दशांशकी विधि अनामिकाकी नीचली दो गांठ, कनिष्टाकी नीचेसे उपरतक तीन, अनामिका और मध्यामकी उपरली दो, तथा तर्जनीके उपरसे नीचेतक तीन गांठ 'न कि रेखायें' यह सब दस 'दशांश'के पत्र हैं॥ मध्यमाके बचे दो पर्वोंको समेरु माने॥

हाथपर जपके समय आपसमें अंगुलियां मिलाकर रखनी और अंगूठेको गांठोंपर फिराते गसीटते लेना न कि उपर उठाकर लेजाना॥

ब्राह्मणगायत्री मन्त्रः

ओं भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ओं १०८ ॥ मालाको सिरपर रखकर **प्राणायाम** करें।

जप निवेदनमें जलका तर्पण करें:—

मनसस्पति ऋषिः, विराट् छन्दः, वातो देवता, विसर्जने विनियोगः॥ देवा गातुविदो ...

ओं देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पत इमं देवयज्ञँ स्वाहा वाते धाः ॥ तर्पणके बचे जलसे माथेको छिडकायें।

आठ मुद्रायें करें (पुस्तकके अन्तपर मूर्तियां देखो)

सुरभि-ज्ञान-चक्रं च योनिः कूर्मोऽथ पङ्कजम्
लिंगं-निर्याणकं चैव अष्टौ मुद्राः प्रकीर्तिताः ॥

तर्पण करें:— अनेन श्रीमहागायत्रीसहस्रजपेन (एकमालाजपेन, दशांशजपेन) धर्मार्थकाममोक्षार्थं श्रीमहागायत्री सावित्री सरस्वती प्रीयतां प्रीता भवतु ॥

माथेको छिडकें। अब गायत्री विसर्जनमें नमस्कार करें ॥

महेशवचनोत्पन्ने विष्णोर्हृदयसम्भवे। ब्रह्मणा समनुज्ञाते गच्छ देवि नमोऽस्तु ते॥
उत्तमे शिखरे देवि भूम्यां पर्वतमूर्धनि। ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम् ॥

गायत्री जपके फलका चिन्तन प्रार्थनामें पढें ॥

दशभिर्जन्मचरितं शतेन तु पुरा कृतम्। त्रियुगं तु सहस्रेण गायत्री हन्ति किल्विषम् ॥

अर्थात् दशांशसे इस जन्मके पाप छूट जाते हैं। एकमालासे पूर्व जन्मके। और हजार मालासे तीन युगोंके पाप नष्ट जाते हैं ॥

तीनों कालकी सन्ध्या यदि प्रभातको ही करनी हो तो सायंसे आरम्भ करना चाहिये । अर्थात प्रथम सायके मन्त्र फिर प्रातः के फिर मध्याह्नके ॥ व्याहृति वैश्वदेव हवनमें भी इसी प्रकार सायसे आरम्भ करना चाहिये ॥

सन्ध्या छूटनेका प्रायश्चित :-

यदि किसी कारणसे सन्ध्या छूट गई हो तो उसका सुलभ उपाय यह है कि ८०००गायत्रीका जप शुभ दिनमें शुद्ध चित्तसे करें ; और अगर सम्भव हो तो व्याहृति हवनभी करें॥ उस हवनका भी सायंके मन्त्रोंसे ही आरम्भ करें । और मनमें यह निश्चय करें कि फिर कदापि सन्ध्याका त्याग न होगा ॥

प्रायश्चित्तन्दुशेखरः- नित्य कर्ममें जो कदापि ठीक समयपर सन्ध्या न की जाये तो एकमालाका उस दिन जियादा जप करना उसका प्रायश्चित है । धर्म सिन्धु । पूर्वर्द्ध ३ परिच्छेद ॥

प्र .क मन्त्रसे प्रत्येक दिशाकी तरफ नमस्कार करें ॥

पूर्वको नारायणस्य दिग्विदिगादि च ।

ओं नमः प्राच्यै दिशे याश्च देवता एतस्यां प्रति वसन्त्येताभ्यश्च वो नमः ।

पूर्वदक्षिणकोणको ओं नमोऽवान्तरायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च वो नमः । दक्षिणको ओं नमो दक्षिणायै दि० ।

दक्षिणपश्चिमकोणको ओं नमोऽवान्तरायै दि० ।

पश्चिमको ओं नमः प्रतीच्यै दि० । पश्चिमोत्तरकोणको ओं नमोऽवान्तरायै दि० । उत्तरको ओं नम

उदीच्यै दि० । पूर्वोत्तरकोणको ॐ नमोऽवा-न्तरायै दि० । ऊपरको ॐ नम ऊर्ध्वायै दि० । नीचेको ॐ नमोऽधरायै दिशे० ॥ तर्पण करें:—
ॐ नमो ब्रह्मणे । नमो अस्त्वग्नये । नमः पृथिव्यै । नम ओषधीभ्यः । नमो वाचे । नमो वाचस्पतये । नमो विष्णवे । बृहते कृणोमि ॥ इत्येतासामेव देवतानां सार्ष्टिं सायुज्यं सलोकतां सामीप्यमाप्नोति । य एवं विद्वान् स्वाध्यायमधीते ॥ माथेको छिडकें

तर्पणकी विधि:— देवता ऋषि और पितरोंका तर्पण सोने रूपे उडुम्बर वा गेण्डाके पात्रसे अथवा अञ्जलिसे, दूध, दही, सर्षप, अक्षत, तिल, शहद, घी, और कुशाके विष्ठरके समेत जल से करना चाहिये । परन्तु तर्पणकी धार गायके सींगके बराबर ऊंची हो । अञ्जलि धरके पूर्वकी तरफ मुखकरके देवताओंका आवाहन करें ॥ गृत्समदस्य गायत्री विश्वेदेवाः ।

ॐ विश्वे देवास आगत शृणुता म इमँ हवम् । एदं बर्हिर्निषीदत ॥

हर एक नाम पर एक २ बार अञ्जलिसे या पात्रसे अंगुलियोंके सिरोंपरसे देवताओंको जल देवें :—

ॐब्रह्मा तृप्यताम् । विष्णुस्तृप्यताम् । रु-द्रस्तृप्यताम् । प्रजापतिस्तृप्यताम् ।

देवास्तृप्यन्ताम्। छन्दांसि तृ०। वेदास्तृ०। ऋषयः तृ०। तपोधनाः तृ० आचार्याः तृ०। गन्धर्वाः तृ०। इतराचार्याः तृ०। संवत्सराः सावयवाः तृप्यंताम्। देव्यः तृप्यंताम्। अप्सरसः तृ०। देवानुगाः तृ०। नागाः तृ०। सागराः तृ०। पर्वताः तृ०। सरितः तृ०। मनुष्याः तृ०। यक्षाः तृ०। रक्षांसि तृ०। पिशाचाः तृ०। सुपर्णाः तृ०। भूतानि तृ०। पशवः तृ०। ओषधयः तृ०। वनस्पतयः तृ०। भूतग्रामश्चतुर्विधः तृप्यताम्। असुराः तृप्यन्ताम्। क्रूराः तृ०। सर्पाः तृ०। जम्बुकाः तृ०। तरवः तृ०। खगाः तृ०। विद्याधराः तृ०। वाय्वाधाराः तृ०। जलाधाराः तृ०। निराधाराः तृ०। आकाशगामिनः तृ०। धर्मरताः तृ०। सर्वे ग्रहाः तृप्यन्ताम्। यमः तृप्यताम्। धर्मराजः तृ०। मृत्युः तृ०। अन्तकः तृ०। वैवस्वतः तृ०। कालः तृ०।

सर्वप्राणहरः तृ०। औदुम्बरः तृ०। नीलः तृ०। दध्नः तृ०। परमेष्ठी तृ०। वृकोदरः तृ०। भीमः तृ०। चित्रः तृ०। चित्रगुप्तः तृ०। पाशहस्तः कृतान्तस्तृप्यताम्॥

ईशान कोनकी तरफ मुखकरके गर्दन और दो अंगूठोंमें यज्ञोपवीत रखें और अञ्जलि धरके ऋषियोंका आवाहन करें

कण्ठोपवीती। ओं अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः। तमीमहे महागयम्॥ हर एक नामपर दो२ बार अञ्जलिसे वा उपरके पात्रोंसे कनिष्ठाओंके मूलपरसे ऋषियोंको जल देवें:—

ओं सनकः तृप्यताम् २। सनन्दनः तृ० २। सनातनः तृ० २। सनत्कुमारः तृ० २। कपिलः तृ० २। आसुरिः तृ० २। वोढा तृ० २। पंचाशिखः तृ० २। मरीचिः तृ० २। अत्रिः तृ० २। अङ्गिराः तृ० २। पुलस्त्यः तृ० २। पुलहः तृ० २। क्रतुः तृ० २। प्रचेताः तृ० २। भृगुः तृ० २। वसिष्ठः तृप्यताम् २। नारदः तृप्यताम् २॥

दक्षिणकी तरफ मुखकरके गर्दन और बाईं भुजामें यज्ञोपवीत धरें और अञ्जलि धरकर पितरोंका आवाहन करें

ततः प्राचीनावीती । शंखस्य त्रिष्टुप् पितरः ।

ओं उशन्तस्त्वा हवामह्युशन्तः समिधीमहि । उशन्नुशत आ वह पितॄन्हविषे अत्तवे ॥ प्रत्येक नामपर तीन २ बार जलाञ्जलिसे वा पात्रसे दाईं अंगूठे और तर्जनीके मध्यमेंसे जल देवें :—

ओं कव्यवाडनलः स्वधा नमः तृप्यताम ३। सोमः स्व० ३। अर्यमा स्व० ३ । यमः स्व० ३ । अग्निष्वात्ताः स्व० तृप्यंताम ३ । बर्हिशदः स्व० ३। हविष्मन्तः स्व० ३ । सोमपाः स्व० ३ । सुकालिनः स्व० ३ । आज्यपाः स्व० ३। वसवः स्व० ३ । रुद्राः स्व० ३ । आदित्याः स्वधा नमः तृप्य० ३॥

अञ्जलि धरकर अपने मृत पितरोंका आवाहन करते जल देवें

शंखस्य त्रिष्टुप् पितरः ।। ओं उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः । असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥

यमस्य त्रिष्टुबङ्गिरसः ॥

ओं आङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः। तेषां वयँ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥

शंखस्य त्रिष्टुप् पितरः। आ यन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वधा च स्वाहा च नित्यमेव भवन्त्विह ॥

आजके मास पक्ष, तिथि और वारका नाम उच्चारणकरके मृतपितरोंक नाम पर, सब पुरुषों और माता पितामही प्रपितामहीको तीन २ बाकी स्त्रियोंको एक २ जलाञ्जलि देवें ॥ दाईं अंगूठे और तर्जनीके मध्यसे स्वर्गवासी पिताका नाम और गोत्र लेकर तीन अञ्जलियां देवें:—

अद्य तावत् – पिता – स्वधा नमः तृप्यताम् ३। पढते २ जल देते जायें:—

वामदेवस्योष्णिगापः। ओं ऊर्जं वहन्तीरमृतं घृतं मधु पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन् ॥ प्रजापतेस्त्रिष्टुप् पितरः।

पितृभ्यः स्वधायिभ्यः स्वधा नमः । पितामहेभ्यः स्वधायिभ्यः स्वधा नमः । प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन् पितरोऽमी मदन्त पितरोऽतीतृपन्त पितरः । पितरः शुन्धध्वम् ॥ ओं ये चेह पितरो ये च नेह याँश्च विद्म याँ २॥ उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञँ सुकृतं जुषस्व ॥

पितामहका नाम और गोत्र बोलकर तीन बार देवें :—

पितामहः — स्वधा नमः तृप्यताम् ३ ।

पितरोंका ध्यान करते जल देते जायें :—

(गौतमस्य) गायत्री विश्वेदेवाः ॥

नारायणस्यार्षम् ॥ ओं मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ १ ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवँ रजः । मधु द्यौरस्तु नः पिता ॥ २ मधुमान्नो वनस्पतिर्मधुमाँ २॥ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ ३ ॥

प्रपितामहका नाम और गोत्र बोलकर तीन बार देवें:—

प्रपितामहः स्वधा नमः तृप्यताम् ३ ॥

श्रद्धासे झुककर और अञ्जलि धरकर नीचेके मन्त्र पढ़ें ।

ॐ नमो वः पितरो मन्यवे । नमो वः पितरः शुष्माय । नमो वः पितरो जीवाय । नमो वः पितरो रसाय । नमो वः पितरो बलाय । नमो वः पितरः क्रूराय । नमो वः पितरः स्वधा वः । पितरो यत्र पितरः । स्वधा यत्र यूयं स्थ सा युष्मासु तथा यूयं यथाभागं मादयध्वं येह पितर ऊर्ग्यत्र वयं स्मः सास्मासु तस्यै वयं ज्योग्जीवन्तो भूयास्म ॥

स्वर्गवासिनी माईका नाम और गोत्र लेकर तीन बार जल देवें

माता — स्वधा नमः तृप्यताम् ३ ॥

इसीतरह आगे पितामही आदि सब पितरोंको जल दे देवें ॥ (परन्तु पितामही और प्रपितामहीको भी तीन२ बार बाकी स्त्रियों को एक २ बारही देवें ॥)

पितामही स्व० प्रपितामही स्व० मातामहः स्व० प्रमातामहः स्व० वृद्धप्रमातामहः स्व० मातामही स्व० प्रमातामही स्व० वृद्धप्रमातामही स्व० जल देते ३ पढ़ें ॥ मातृपक्ष्यास्त

ये केचिद्ये चान्ये पितृपक्षजाः। गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः ॥ ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः । जलदानेन ते सर्वे लभन्तां तृप्तिमुत्तमाम् ॥ समस्तमातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्यो हिमपानं स्वधा, क्षीरपानं स्वधा, मधुपानं स्वधा, तिलोदकं स्वधा, उदकतर्पणं स्वधा । हिमं २ रजतम् २ ॥

यज्ञोपवीतको गर्दन और दाईं भुजामें रखकर अंगुलियोंके सिरों परसे जल देवें:– सव्येन । वसन्ताय नमः । ग्रीष्माय नमः । वर्षाभ्यो नमः। शरदे नमः। हेमन्ताय नमः। शिशिराय नमः। षड्तुभ्यो नमः ॥ देवासुरास्तथा यक्षा नागा गन्धर्वकिन्नराः। पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ॥

यज्ञोपवीतको गर्दन और दो अंगूठोंमें रखकर कानिष्ठाओंके मूल परसे जल देवें :– कण्ठोपवीती। जलेचरा भूनिलया वाय्वाधाराश्च जन्तवः । तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः ॥

बाईं भुजामें यज्ञोपवीत रखकर दाईं अंगूठे और तर्जनीके मध्यसे जल देवें :— अपसव्येन । नरकेषु च सर्वेषु यातनासु च ये स्थिताः । तेषामाप्यायनायैतद्दीयते सलिलं मया ॥ येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः । ते तृप्तिमखिला यान्तु यश्चास्मत्तोऽभिवाञ्छति ॥ येषां गृहे मया भुक्तं येषां भुंजाम्यहं पुनः । पुत्रदारविहीनाश्च नरके वा वसन्ति ये ॥ तेभ्यः सर्वेभ्यः पितृभ्य इदमस्तु तिलोदकम् ॥

माघकी शुक्ल पक्ष अष्टमीके दिन भीष्म पितामहका तर्पण और श्राद्ध करना महाभारत हेमाद्रि व पद्मपुराणकी आज्ञासे ब्राह्मण आदिकोंका आवश्यक कर्म और पुत्र पौत्र वर्द्धक लिखा है उस का नकरना बर्समें किये पुण्यका नाशकभी लिखा है इस कारण उस तर्पणकी विधि लिखी जाती है :— अपसव्येन करके ओं तत्सद्ब्रह्मेत्यादि पढकर तिल, दर्भ, विष्ठर, और जलसे,

वैयाघ्रपद (द्य) गोत्राय संकृतिप्रवराय च । अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे । पितामहः भीष्मभारद्वाजगांगेयः स्वधा नमः तृप्यताम् ३ ॥ भीष्मः शन्त-

नवो वीरः सत्यवादी जितेन्द्रियः । आ-
भिरद्भिरवाप्नोतु पुत्रपौत्रो चितां क्रियाम्॥

यज्ञोपवीतको गर्दन और दाईं भुजामें रखकर जल देवें :—

सव्येन । नमो देवेभ्यः । यज्ञोपवीतको गर्दन और दो अंगूठोमें रखकर जल देवें:– कण्ठोपवीती । स्वाहा ऋषिभ्यः । यज्ञोपवीतको गर्दन और बाईं भुजामें रखकर जल देवें:– अपसव्येन । स्वधा पितृभ्यः ।

यज्ञोपवीतको दाईं भुजा और गर्दनमें रखकर जल देवें :–

सव्येन । आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरम् । जगत्तृप्यतु ३ एवमस्तु ॥

सूर्य देवताको गायत्रीमन्त्र और हंसः शुचिषत् – इत्यादि मन्त्र पढकर तिल, दर्भ, समेत जलसे अर्घ्य देकर नमस्कार करें:—

नमो धर्मनिदानाय नमः सुकृतसाक्षिणे ।
नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ॥
ॐ नमो विवस्वते ब्रह्मन्भानवे विष्णुते-
जसे । जगत्पवित्रे शुचये सवित्रे शर्मदा-
यिने ॥

अङ्गोचा बाईं तरफकी शिला वा देहलीपर निचोडें, नदी आदि तीर्थमें कभी न निचोडें, स्नान निष्फल होजाता है ॥ और देव ऋषि पितरोंके तर्पणसे पहलेभी न निचोडें ॥ पितर देवों और ऋषिओं समेत निराश होकरवापस जाते हैं । श्राद्धके दिन श्राद्ध

करके इसको देहलीपर निचोड़ें ॥ निचोडनेका मन्त्र :—

अपसव्येन । अस्मत्कुले तु ये जाता अपुत्रा गोत्रजा मृताः । ते पिबन्तु मया दत्तं वस्त्र-निष्पीडनोदकम् ॥ तीर्थको नमस्कार करें

शान्तिः पुष्टिस्तथा तुष्टिः सन्तु मे त्वत्प्र-सादतः । सर्वपापप्रशान्तिश्च तीर्थराज नमोस्तु ते ॥ गङ्गा और वितस्ताको नमस्कार

अक्षसूत्राम्बुजकरामादर्शकलशान्विताम् मीनपद्मासनासीनां वितस्तां शरणं श्रिये॥ गङ्गैव मुक्तिदा क्षेत्रे गङ्गा किल्विषना-शिनी । त्रैलोक्यां पाहि मे गङ्ग हरिगङ्गे नमोस्तु ते ॥

इति सन्ध्योपासनविधिः समाप्तः ॥

॥ यज्ञोपवीत बनानेका तरीका ॥

१ जीवितपति ब्राह्मणीके वा ब्राह्मणकन्याके हाथसे, उनके न मिलनेमें पतिव्रतास्त्रीके हाथसे, उस केभी न मिलनेमें सच्चरित्रवाली विधवाब्राह्मणीके ही हाथसे, शुद्ध रूईको बिनौलोंसे अलग करके हाथ सेही धुनवाके, फिर कतवाके जो यह सूतकी तार छेद

रहित बने, उसी तारसे ब्राह्मण शुद्ध स्थानमें बैठकर यज्ञोपवीत बनाना आरम्भ करे। आरम्भसे समाप्त तक गायत्री मंत्र मनमें जपना चाहिए ॥

२ खोलकर रखे हुये बायें हाथकी मिली हुई चार अङ्गुलियोंकी जडपर कनिष्ठाकी हथेलीकी तरफकी जडसे आरम्भ करके उसीके पीठकी तरफकी जड तक लपेटकर कुल नौ अंगुल लम्बाईका नाम वामाहै

३ इसी वामापर विवाहित पुरुषके ६ लडी यज्ञोपवीतके वास्ते १९२बार तार लपटें और (अविवाहित ब्रह्मचारी) ३ लडी यज्ञोपवीतके वास्ते ९६ बार तार लपटें जिससे १९२ (व ९६) वामा लम्बी तार बने। अन्तपर पहोंछकर बाकी तारसे काटनेके विनाही गिनी हुई तारको दुहरी बनाके फिर अन्तपर पहोंछ कर उस दुहरी तारको तिहरी बनावें अब तिहरी तार बननेके बाद बाकी बची तारको काट छोडे।

४ अब उस तिहरी तारको शुद्ध पानीमें थोडे समय भिगो रखकर फिर उपरको बटकर त्रिवलित करें। ताकि यह १९२ वामा लम्बी तिहरी तार ६४ वामा लम्बी और ९गुणी बने (और ९६ वामा लम्बी तिहरी तार ३२ वामा लम्बी और ९ गुणी तार बने) फिर इसे नीचेको बटकर ६४ वामावाली तार ६लडी और [३२ वामावाली लम्बी तार ३ लडी वाले] यज्ञोपवीतके वास्ते तैयार हुई ॥

बनाना एकवार परोहितसे सीख रखना चाहिए ॥

७
८
अगम्यागमन निवा०
लिं चतुर्मुखाय नमः
ब्रह्महत्या निवार०
यं पंचमुखाय नमः
मं षण्मुखाय नमः
स्त्रीहत्या निवार०
मौं अधोमुखाय नमः
गोहत्या निवार०
गुरुतल्पगमनदोषनि०
व एकमुखाय नमः

१९
परम पद प्राप्त्यर्थं
यो कूर्माय नमः
२०
पद प्राप्त्यर्थं
य नमः
२१
पद प्राप्त्यर्थं
२२
पद प्राप्त्यर्थं
यो महा
२३
जाग्रत पद प्राप्त्यर्थं
२४
पद प्राप्त्यर्थं

सुरभिः
ज्ञानम्
वज्रम्
योनिः
कूर्मः
पंकजम्

लिंगम्
देव तीर्थ

51

चतुर्विंशति मुद्रा हि गायत्र्याः सुप्रतिष्ठिताः॥ वृथा स्नानं वृथा संध्या वृथा होमो वृथा जपः यो ति मुद्रां न जानाति सर्वं तन्निष्फलं भवेत्॥

मोहनात्सर्वदेवानां द्रावनात्पातकैः तस्मान्मुद्रेयमाख्याता सर्वकर्मार्थसाधिनी॥

मिलनेका पता :—

पंडित ... एन्ड सन्स

... मालिक

'... प्रेस

... कश्मीर